बलिम्मुः, त्रि, (बल्यते बध्यते इति । बल + इम्नुः ।) अपमानितः । इत्युणादिकोषः ॥

ब(व)लिसद्म, [न्] क्ली, (बलेस्तदाख्यदैत्यस्य सद्म निकेतनम् ।) रसातलम् । इत्यमरः ।१।८।१॥

ब(व)लिहा, [न्] पुं, (बलिं हन्ति इति । बलि + हन् + क्विप् । वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

ब(व)ली, [न्] पुं, (बलमस्यास्तीति । बल + "बलादिभ्यो मतुबन्यतरस्याम् ।" ५ । २ । १३६ । इति पक्षे इनिः ।) बलरामः । इति शब्दरत्नावली ॥ उष्ट्रः । महिषः । वृषभः । सूकरः । कफः । कुन्दवृक्षः । इति जटाधरः ॥ माषः । (स्वनामख्यातो वत्सप्रीपुत्रः । यथा, मार्कण्डेये । ११८ । २ ।

"बली बलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥")

बलयुक्ते, त्रि । तत्पर्य्यायः । ऊर्ज्जलः २ निदिग्धः ३ मांसलः ४ उपचितः ५ । इति हेमचन्द्रः । ३ । ११२ ॥ (यथा, मार्कण्डेये । ३४ । ८६ ।

"साद्धं न बलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः ॥")

ब(व)ली, स्त्री, (बलि + पक्षे ङीष् ।) बलिः । जरया श्लथचर्म्म । इत्यमरटीकायां भरतः । (यथा,—

"कुष्ठं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम् ।
भक्षणात् स्वप्नवेलायां वलीपलितनाशनम् ॥"

इति वैद्यकभैषज्यधन्वन्तरौ रसायनाधिकारे ॥)

ब(व)लीकं, क्ली, (बलति संवृणोतीति । बल संवरणे + "अलीकादयश्च ।" उणा० ४ ।२५। इति कीकन् ।) पटलप्रान्तम् । इत्यमरः । २ । २ । १४ ॥ छाँचि इति भाषा ॥ (यथा, माघे । ३ । ५३ ।

"यस्यामसेवन्त नमद्वलीकाः
समं वधूभिर्वलभीर्युवानः ॥")

ब(व)लीमुखः, पुं, (वलीयुक्तं मुखं यस्य ।) वानरः । इत्यमरः । २ । ५ । ३ ॥

ब(व)लीयान्, [स्] त्रि, (अतिशयेन बलवान् । बलवत् + ईयसुन् ।) अतिशयबलयुक्तः । यथा,—

"आगमादेशयोर्मध्ये बलीयानागमो विधिः ॥"
इति दुर्गादासटीका ।

ब(व)लीवर्द्दः, पुं, (ईर्लक्ष्मीः वर् वरणम् । वर् ईयायां क्विप् । ईश्च वर् च ईवरौ तौ ददातीति ईवर्द्दः । बलमस्यास्तीति बली । ततो बली च ईवर्द्दश्च इति ।) वृषः । इत्यमरः । २ । ९ । ५९ ॥ (यथा, कथासरित्सागरे । २० । २७ ।

"संयोज्याथ बलीवर्द्दयुगं रचितमङ्गलः ।
कृत्वा बलिं तस्य तरोरारेभे कृषिमत्र सः ॥")

तीर्थयात्रायां तदारूढ़स्य दोषो यथा,—

"बलीवर्द्दसमारूढ़ः श्रृणु तस्यापि यत् फलम् ।
नरके वसते घोरे गवां क्रोधे हि दारुणे ।
सलिलञ्च न गृह्णन्ति पितरस्तस्य देहिनः ॥"
इति मात्स्ये ८८ अध्यायः ।

ब(व)ल्यं, क्ली, (बलाय हितम् । बल + "उगवादिभ्यो यत् ।" ... इति यः ।) प्रधानधातुः । शुक्रम् । बलकरे, त्रि । इति मेदिनी । ये, ४० ॥ (यथा,—

"कट्वम्लवीर्य्यो लघुनो हितश्च
स्निग्धो गुरुस्वादुरसोऽथ बल्यः ॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥)

बल्यः, पुं, (बलाय मुक्तये हितः । बल + यः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

बल्या, स्त्री, (बलाय हिता । बल + "उगवादिभ्यो यत् । ... " ४ । १ । ८० । इति यः । ततष्टाप् ।) अतिबला । अश्वगन्धा । प्रसारिणी । इति राजनिर्घण्टः ॥

बल्ह, ड स्तुतौ । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीयोपधः । ड, बल्हते । इति दुर्गादासः ॥

बष्कयणी } बष्कयिणी } स्त्री, (बष्कयस्तरुणवत्सः । सोऽस्ति अस्याः । बष्कय + पामादित्वात् पक्षे इनिः । अटकुप्वाडिति णत्वम् । ततो ङीप् ।) चिरप्रसूता गौः । इत्यमरभरतौ ॥ (यथा, सिद्धान्तकौमुद्याम् । २ । १ । ६५ ।

"पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः ॥")

बहु, त्रि, (बंहते इति । बहि वृद्धौ + "लङ्घिबंह्योर्नलोपश्च ।" उणा० १ ।३० । इति कुर्नलोपश्च ।) त्र्यादिसंख्या ॥ अनेकम् । विपुलः । इति मेदिनी । हे, ६ ॥ तत्पर्य्यायः । प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ बहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ ॥ तद्वैदिकपर्य्यायः । उरु १ तुवि २ पुरु ३ भूरि ४ शश्वत् ५ विश्वम् ६ परिणसा ७ व्यानशिः ८ शतम् ९ सहस्रम् १० सलिलम् ११ कुवित् १२ । इति द्वादश बहुनामानि । इति वेदनिघण्टौ । ३ । १ ॥ (यथा, मनुः । ७ । ८६ ।

"अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम् ॥"

तथा, तत्रैव । ८ । ७७ ।

"एकोऽलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः ॥"

बहुमतम् । बहुमानम् । यथा, रघुः ।१२। ८९ ।

"रामस्तुलितकैलासमरातिं बह्वमन्यत ॥")

बहुकः, पुं, (बहु + संज्ञायां कन् ।) कर्कटः । अर्कः । दात्यूहः । जलखातकः । इति मेदिनी । के, १२६ ॥ ("संख्याया अतिशदन्तायाः कन् ।" ५ । १ । २२ । इति कन् । बहुभिः क्रीते, त्रि ।)

बहुकण्टकः, पुं, (बहूनि कण्टकान्यस्य ।) क्षुद्रगोक्षुरः । यवासः । हिन्तालः । इति राजनिर्घण्टः ॥

बहुकण्टका, स्त्री, (बहूनि कण्टकान्यस्याः ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

बहुकण्टा, स्त्री, (बहवः कण्टाः कण्टकानि यस्याः ।) कण्टकारी । इति राजनिर्घण्टः ॥ (विवृतिरस्याः कण्टकारीशब्दे ज्ञातव्या ॥)

बहुकन्दः, पुं, (बहवः कन्दा यस्य ।) शूरणः । इति राजनिर्घण्टः ॥

बहुकन्दा, स्त्री, (बहवः कन्दा यस्याः ।) कर्कटी । इति राजनिर्घण्टः ॥

बहुकरः, पुं, (बहु कार्य्यं करोतीति । बहु + कृ + "दिवाविभानिशाप्रभेति ।" ३ । २ । २१ । इति टः ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

बहुकरः, त्रि, (बहु करोति भुवं संमार्ष्टि इति । बहु + कृ + टः ।) मार्ज्जनकारी । तत्पर्य्यायः । खलपूः २ । इत्यमरः । ३ । १ । १७ ॥ भूमिसम्मार्ज्जकः ३ । इति शब्दरत्नावली ॥ बहुकार्य्यकर्त्ता । यथा, भट्टिः । ५ । ७८ ।

"निहन्ता वैरकाराणां सतां बहुकरः सदा ।
मारश्चाधिकरोऽमुष्य शक्तेरन्तकरो रवेः ॥"

बहुकरी, स्त्री, (बहु करोति भुवं संमार्ष्टि इति । बहु + कृ + टः । ङीष् ।) सम्मार्ज्जनी । इति हेमचन्द्रः । ४ । ८२ ॥

बहुकर्णिका, स्त्री, (बहवः कर्णा इव पत्राणि यस्याः ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुकूर्च्चः, पुं, (बहूनि कूर्च्चानि यस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

बहुगन्धं, क्ली, (बहुर्गन्धो यस्मिन् ।) त्वचम् । इति राजनिर्घण्टः ॥ (दारचिनी इति भाषा ॥)

बहुगन्धः, पुं, (बहुर्गन्धो यस्मिन् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥ (उग्रगन्धे, त्रि ॥)

बहुगन्धदा, स्त्री, (बहुगन्धं ददाति या । बहुगन्ध + दा + क ।) कस्तूरी । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः कस्तूरीशब्दे ज्ञातव्याः ॥)

बहुगन्धा, स्त्री, (बहुर्गन्धो यस्याम् ।) चम्पककलिः । यूथिका । कृष्णजीरकः । इति राजनिर्घण्टः ॥

बहुगर्ह्यवाक्, [च्] त्रि, (बहु गर्ह्या बहु निन्दिता वाग् यस्य ।) कुत्सितबहुवादी । इत्यमरः ॥

बहुग्रन्थिः, पुं, (बहवो ग्रन्थयो यस्य ।) झावुकः । इति शब्दचन्द्रिका ॥ (झाउ इति भाषा ॥)

बहुच्छिन्ना, स्त्री, (बहु यथा स्यात्तथा छिद्यते स्मेति । बहु + छिद् + क्त ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

बहुतः, [स्] व, (बहुभ्य इत्यर्थे बहुशब्दात् "पञ्चम्यास्तसिल् ।" ५।३।७। इति तसिल्प्रत्ययः ।) बहुभ्यः ॥

बहुतन्त्रिः, त्रि, (बहवस्तन्त्रयो यस्य ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रिः कायः । बहुतन्त्री ग्रीवा । बहुतन्त्रि गात्रम् । यथा च । विभज्य नक्तं दिवमस्ततन्द्रिणेति किराते ह्रस्वेकारान्ततन्त्रिशब्दस्य प्रयोगः । इति संक्षिप्तसारः ॥

बहुतन्त्रीः, त्रि, (बहवस्तन्त्र्यो यस्मिन् ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीर्ग्रीवा बहुतन्त्रीर्धमनी । इति सिद्धान्तकौमुदी ॥ एवं बहुतन्त्रीः कायः । बहुतन्त्रि गात्रम् ।

बहुतन्त्रीकः, त्रि, (बहुतन्त्री + स्वार्थे कन् ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीका ग्रीवा ।